S.V. Apte, English-Sanskrit Dictionary -- 3rd ed. Pune 1920



स्वार्थापेक्षक; 'from m. motives ' लाभदृष्ट्या, लाभेच्छया, स्वार्थापेक्षया. 2 भृतक, वैतनिक (की *f.*), भृति-भरण्य-भुज्, वेतनार्थिन्. -*s.* भृतकः, भृति-भरण्य-भुज् *m.*, वैतनिकः, वेतनार्थिन् *m.* **-ly,** *adv.* लाभदृष्ट्या, लाभापेक्षया, भृतकवत्, स्वार्थबुद्ध्या. **-ness,** *s.* लाभदृष्टि *f.*-अपेक्षा-बुद्धि *f.*, धनलाभलोभः, स्वार्थ-वेतन-अपेक्षा.

**Mercer,** *s.* कौशेयोर्णवस्त्रवणिज् *m.* **-y,** *s.* कौशेयवस्त्रव्यवहारः.

**Merchant,** *s.* वणिज् *m.*, वाणिजः, आपणिकः, नैगमः, सार्थवाहः, पण्याजीवः क्रयविक्रयिकः, वैदेहकः, सार्थिकः, व्यवहारिन् *m.*, वाणिज्योपजीविन् *m.* श्रेष्ठिन् *m.*; 'm.'s business, वाणिज्यं, वणिक्क्रिया; ' m. 's exchange' श्रेष्ठिचत्वरं; ' voyaging or seafaring m.' सांयात्रिकः, पोतवणिक्; 'company of m.s' सार्थः, निगमः. **-able,** *a.* पण्य, पण्यार्ह. **-Merchandise** *s.* वाणिज्यं, व्यवहारः, क्रयविक्रयौ ( du. ) 2 पण्यं, भांडानि, पण्यद्रव्याणि, वाणिजद्रव्यं-भांडं-पण्यं. **-Mercantile,** *a.* वाणिज ( जी *f.* ), वाणिजिक ( की *f.* ), वाणिज्यसंबंधिन्.

**Mercury,** *s.* पारदः, चपलः, रसः, सूतः, पारतः; 'white sublimate of m.' रसकर्पूरः; ' sulphuret of m.' कज्जली. 2 बुधः, रौहिणेयः, सौम्यः. **-al,** *a.* पारदात्मक, पारदमय ( यी *f.* ), सपारद. 2 चपल, लघुशरीर, सोत्साह, तेजस्विन्. 3 द्रव्यपरायण, धूर्त.

**Mercy,** *s.* दया, कृपा, करुणा, अनुकंपा, अनुक्रोशः, कारुण्यं, घृणा, दया, कृपाशीलता, दयालुता, क्षमाशीलता, दया-कृपा-बुद्धि *f.* 2 प्रसादः, अनुग्रहः. 3 क्षमा, तितिक्षा 'fountain of m.' करुणाकरः, दयासागरः; दयानिधिः; ' an object of m. ' कृपापात्रं-भाजनं, अनुकंप्य, अनुग्राह्य, तपास्विन्; ' to show m. ' दय् 1 A ( with gen. ), अनुकंप् 1 A ( with acc. ), दयां कृ 8 U ( with loc. ); ' m., Oh king ' क्षमस्व राजन्. **-ful,** *a.* दयालु, कृपालु, कृपा-दया-करुणा-शील, करुणार्द्र, दयार्द्र, अनुकंपिन्, सदय, सकरुण, सानुक्रोश, क्षमाशील; वत्सल, दयाबुद्धि-दृष्टि; *See* **Kind. -fully,** *adv.* सदयं, सकरुणं, सानुकंपं, दयया, करुणया, सानुक्रोशं. **-fulness,** *s.* दया, कृपा, घृणा, दयाशीलता, अनुकंपा, वात्सल्यं; *See* ( *s.* ). **-less,** *a.* निर्दय, निष्करुण, निर्घृण, अकरुण, कठोर, निष्कृप, निष्ठुर, नृशंस. **-lessly,** *adv.* निर्दयं, निष्कृपं, निर्घृणं, निष्ठुरं.

**Mere,** *a.* केवल, शुद्ध; gen. ex. by एव, or मात्र in comp.; ' by m. touch ' स्पर्शमात्रेण; ' a m. fool ' मूर्ख एव, केवलमूर्खः. -*s.* सरस् *n.*, ह्रदः; *See* **Lake. 2** पर्यंतः, सीमा; *See* **Boundary. -ly** *adv.* केवलं, एव, मात्र in comp.; 'by m. advising' उपदेशमात्रात्, उपदेशादेव, &c.

**Meretricious,** *a.* कृत्रिमशोभामय ( यी *f.* ), बाह्यरुचिर, कृत्रिमरागवत्, मिथ्याशोभन. 2 पण्यांगनीय, वेश्यासंबंधिन्. **-ly,** *adv.* मिथ्याशोभया.

**Merge,** *v. i.* नि-,मस्ज् 6 P, अव-गाह् 1 A ( lit ); निपा-ग्रस्-pass., प्र-वि-ली 4 A, वि-लुप् pass., नश् 4 P, ( fig. ); ' one fault m. s in a collection of good qualities' एको हि दोषा गुणसन्निपाते निमज्जति ( K. I. 3 ). -*v. t.* मस्ज् c., (मज्जयति), अवगाह् c. 2 नश् c., वि-लुप् 6 P or c., ग्रस् 1 A, नि-पा 1 P, प्र-वि-ली c. **-Mersion,** *s.* मज्जनं, अवगाहः-हनं.

**Meridian,** *s* मध्याह्नः, दिनमध्यं, मध्याह्नकालः-समयः. 2 खमध्यं; ' distance from the first m. ' रेखांतरं; ' the sun is on the m. ' नभसो मध्यमलंकरोति भानुः 3 परा कोटिः-काष्ठा, उत्कर्षः. -*a.* माध्याह्निक ( की *f.* ). 2 खमध्यसंबंधिन्. 3 उत्तम, परम; oft. ex, by परा कोटिः, परा काष्ठा.

**Meridional,** *a.* दक्षिणदेशीय; दक्षिणाभिमुख ( खी *f.* ).

**Merit,** *s.* गुणः, योग्यता, पात्रता, उत्कर्षः, श्रेष्ठता, विशिष्टता, विशेषः, गुणोत्कर्षः, गुणवत्ता. 2 ( M. s ) गुणागुणौ, गुणदोषौ, धर्माधर्मौ. 3 पुण्यं, धर्मः, सुकृतं, श्रेयस् *n.*, वृषः; 'acquired by m.' पुण्यार्जित; 'efficacy of m. ' पुण्यप्रतापः-प्रभावः; ' one possessing many m. s' पुण्यनिधिः-राशिः-सागरः, पुण्यात्मा. -*v. t.* अर्ह् 1 P, अर्ह-योग्य-in comp.; *See* **Deserve;** ' m. ing censure ' निंद्य, गर्हणीय, निंदापात्रं. **-ed,** *a.* युक्त, उचित, योग्य; *See* **Proper. -Meritorious,** *a.* प्रशस्य, श्लाघ्य, प्रशस्त, श्लाघार्ह, प्रशंसार्ह. 2 गुणिन्, गुणवत्, गुणसंपन्न, गुणोपेत, गुणान्वित. 3 पुण्यवत्, पुण्यशील, पुण्यात्मन्, पुण्यात्मक, पुण्यशालिन्; पुण्य, पुण्यरूप, अवदात (deed); ' a m. deed ' पुण्यं, धर्मः, सुकृतं, अवदातं कर्म. **-ly,** *adv.* श्लाघ्यतया, प्रशस्यं. **-ness,** *s.* गुणवत्ता, पात्रता, योग्यता, &c.

**Mermaid,** *s.* मत्स्यांगना, मत्स्यस्त्री.

**Merry,** *a.* प्र-,हृष्ट, सानंद, सोल्लास, प्रोत्फुल्ल, प्रमुदित, प्रहृष्टचित्त; आनंद-उल्लास-हास्य-वृत्ति, प्रसन्नवदन, विलासिन्, विनोदिन्, परिहासशील. 2 हास्यकर ( री *f.* ), विनोदक; ' to make m. ' उत्सवं कृ 8 U; ' to be m.' उल्लस् 1 P, मुद् 1 A; *See* **Delight.** ' m.-andrew ' भंडः, वैहासिकः, विदूषकः. ' m.-making ' आनंदोत्सवः, उत्सवकरणं. **-ly,** *adv.* सहर्षं, सोल्लासं, सानंदं, हृष्टमनसा, **-ment,** *s.* प्र-,हर्षः, उल्लासः, प्र-,मोदः, आनंदः, आह्लादः; हास्यं, परिहासः, उत्सवः, कौतुकं, विलासः, विनोदः; लीला, खेला;

Institute of Indology & Tamil Studies Cologne University Germany 9/1/2007